## संस्कृतबालादर्शे षष्टः पाठः ॥ ६

| | |
|---|---|
| नौका । | षकटम् । |
| इयं नौका । | इदं षकटम् । |

| | | |
|---|---|---|
| नाविकः । | चन्द्रः । | शाकटिकः । |
| क्षेपणी । | पादः । | कशा । |
| नदी । | नारी । | चक्रम् । |

आवाम् । युवाम् ।

आवां शकटेन गृहं गच्छावः । युवां नौकया नदीं तरथः । नाविकः क्षेपण्या नौकां क्षिपति । शाकटिकः कशया वृषभौ ताडयति ।शकटं चक्राभ्यां गच्छति । लता पुष्पैः लसति । बालकः हस्तेन चन्द्रम् आह्वयति ।जनाः पादाभ्यां गच्छन्ति । नारी पत्या विलसति ॥

**क ) प्रश्नाः ।**

१ ॥ युवां केन गृहं गच्छथः? आवां शक्टेन गृहं गच्छावः ।

२ ॥ लता कैः लसति? लता पुष्पैः लसति ।

३ ॥ नारी केन विलसति? नारी पत्या विलसति ।

४ ॥ आवां कया नदीं तरावः? युवां नौकया नदीं तरथः ।

५ ॥ शकटं काभ्यां गच्छति? शकटं चक्राभ्यां गच्छति।

६ ॥ जनाः काभ्यां गच्छन्ति ? जनाः पादाभ्यां गच्छन्ति।

७ ॥ नाविकः कया नौकां क्षिपति ? नाविकः क्षिपण्या नौकां क्षिपति।

८ ॥ शाकटिकः कया वृषभौ ताडयति? शाकटिकः वृषभौ कशाया ताडयति।

९ ॥ बालकः कथं चन्द्रम् आह्वयति ? बालकः हस्तेन चन्द्रं आह्वयति।

**ख) तद् शब्दस्य रूपैः वाक्यानि पूरयत।**

१। ________ नाविकः नौकां क्षिपति। <u>**सः**</u> नाविकः नौकां क्षिपति।

२। ________ लता कुसुमैः विलसति। <u>सा</u> लता कुसुमैः विलसति।

**ग)** लट् रूपैः वाक्यानि पूरयत।

१। इमे बालाः पादाभ्यां पाठालयं (गच्छ्)।

इमे बालाः पादाभ्यां पाठालयं <u>**गच्छन्ति**</u>।

३। वयं कर्णाभ्यां शब्दम् (आकर्ण्)।

वयं कर्णाभ्यां शब्दम् <u>**आकर्णामः**</u>।

३। नासिकया वयं गन्धं (जिघ्र्)।

नासिकया वयं गन्धं <u>जिघ्रामः</u>।

४। बालकाः विद्यया (लस्)।

बालकाः विद्यया <u>**लसन्ति**</u>।

# **<u>शब्दसंग्रहः śabdasaṅgrahaḥ = Vocabulary</u>**

नौका = *f* boat, नाविकः = *m* boat man, क्षेपणी = *f* oar, शकटम् = *n* cart, शाकटिकः = *m* cart man, कशा = *f* whip, चक्रम् cakram = *n* wheel, पादः = *m* foot, नारी = *f* woman, आवाम् = we two, युवाम् = you two, तरथः = *P.* you two cross, क्षिपति = *P.* pushes, वृषभः = *m* bull, ताडयति = *P.* beats, whips, आह्वयति = *P.* calls, invites, जिघ्रति = *P.* smells, आकर्ण् = *P.* listen,